दिवेत्यस्य प्रजापत्यश्विसरस्वत्यऋषयः आपो देवता अनुष्टुप् छन्दः पावने विनियोगः। ॐ द्रुपाददिवमुमुचानः स्विन्नः स्नातोमलादिव ॥ पूतंपवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ॥ पुनातु ॥ १४ ॥ शन्नोदेवीत्यस्य सिंधुद्वीप ऋषिः गायत्री छंदः आपो देवता पावने विनियोगः ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः ॥ पुनातु ॥ १५ ॥ अपाᳯरसमित्यस्य बृहस्पतिर्ऋषिः रसोदेवता अनुष्टुप् छन्दः पावने विनियोगः। ॐ अपाᳯरसमुद्वयसᳯ सूर्य्येसन्तᳯ समाहितम् ॥ अपाᳯरसस्ययोरसस्तम्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्येषते योनिरिन्द्रायत्वाजुष्टतमम् पुनातु ॥ १६ ॥ अपो देवीरित्यस्य सिन्धुद्वीप ऋषिरापो देवता न्यंकुसारिणी बृहती छन्दः पावने विनियोगः। ॐ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः। तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ पुनातु ॥ १७ ॥ पुनन्तु मेत्यस्य प्रजापतिर्ऋषिः पितरो देवता अनुष्टुप् छन्दः पावने विनियोगः ॥ ॐ पुनन्तुमापितरः सोम्यासः पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥ पवित्रेणशतायुषा ॥ पुनातु ॥१८

राम
॥६॥

मापः प्रवहतावद्यञ्चमलञ्चयत् ॥ यच्चाभिदुद्रोहानृतंयच्चशेपेऽअभीरुणम्॥आपोमातस्मादेनसः पवमानश्चमुञ्चतु॥ पुनातु ॥९॥ हविष्मतीरित्यस्य प्रजापतिऋषिर्लिङ्गोक्ता देवता अनुष्टुप् छन्दः पावने विनियोगः ॥ ॐ हविष्मतीरि माऽआपो हविष्मा२ँ । आविवासति॥ हविष्मान्देवोऽअध्वरोहविष्मा२ँ॥ अस्तुसूर्यः॥पुनातु॥१०॥देवीराप इत्यस्य प्रजा पति ऋषिरापो देवता पंक्तिश्छन्दः पावने विनियोगः ॥ ॐ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्यऽइन्द्रियावान्मदि न्तमः ॥ तन्देवेभ्यो देवत्रादत्तशुक्रपेभ्योयेषाम्भागस्थस्वाहा ॥ पुनातु ॥ ११ ॥ कार्षिरसीत्यादीनां त्रयाणां प्रजापति ऋषिः । कार्षिरसीत्यस्याक्षरचतुष्टयस्याज्यं देवता समुद्रस्यसमाप इत्यस्य चापो देवता त्रयाणामनुष्टुप् छन्दः पावने विनियोग । ॐ कार्षिरसिसमुद्रस्यत्वा क्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधीः ॥ पुनातु ॥ १२ ॥ अपोदेवा इत्यस्य वरुण ऋषिरापोदेवता त्रिष्टुप् छन्दः पावने विनियोगः । ॐ अपोदेवामधुमतीरगृभ्णन् नूर्जस्वतीराजस्वश्चितानाः । जाभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ पुनातु ॥ १३ ॥ द्रुपदा

8

स्तूष्णीं निमज्योन्मज्याचामेत् ॥ ततो वक्ष्यमाणैरोङ्कारादिभिर्मन्त्रैः प्रतिमन्त्रं कुशत्रयेण सजलेन नाभिदक्षिणपार्श्व मारभ्यपाणिं शिरोपरि नीत्वा नाभिवामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं पावयेत् ॥ मन्त्रा यथा॥ ॐकारस्य ब्रह्माऋषिः परमात्मा देवता गायत्री छन्दः पावने विनियोगः॥ ॐ पुनातु। महाव्याहृतीनां प्रजापति ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि पावने विनियोगः। ॐ भूः पुनातु ॥ २ ॥ ॐ भुवः पुनातु ॥ ३ ॥ ॐ स्वः पुनातु ॥ ४ ॥ तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः पावने विनियोगः॥ ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियोयोनः प्रचोदयात् ॥ ॐ पुनातु ॥ ५ ॥ आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिरापो देवता गायत्री छन्दः पावने विनियोगः॥ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ६ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ।। उशतीरिवमातरः ॥ ७ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजन यथाचनः ॥ पुनातु ॥ ८ ॥ इदमित्यस्य प्रजापति ऋषिरापो देवता महापंक्तिश्छन्दः पावने विनियोगः॥ ॐ इद

द्वेषाᳪसि प्रमुमुग्ध्यस्मत् ॥ ३ ॥ सत्वन्न इति मन्त्रस्य वामदेव ऋषिः अग्नीवरुणौ देवते त्रिष्टुप् छन्दः अभिषे०।
ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्या ऽउषसो व्युष्टौ। अवयक्ष्वनो वरुणᳪ रराणोवीहि मृडीकᳪ सुवो न
ऽएधि ॥ ४ ॥ माप इति प्रजापति ऋषिर्हृदयशूलं देवता यजुः अभिषे०। ॐ मापोमौषधीर्हिᳪसीर्द्धाम्नोधाम्नो
राजं स्ततो वरुणनोमुञ्च। यदाहुरघ्न्या ऽइति वरुणेतिशपामहे ततो वरुण नो मुञ्च ॥ ५ ॥ उदुत्तममिति मन्त्रस्य
शुनःशेपऋषिर्वरुणोदेवता त्रिष्टुप् छन्दः अभिषेके विनियोगः। ॐ उदुत्तमं वरुणपाशमस्मदवाधमम्विमद्ध्यमᳪश्रथाय।
अथावयमादित्यव्रतेतवानागसोऽ अदितये स्याम ॥ ६ ॥ मुञ्चन्त्विति मन्त्रस्य आथर्वणोभिषक् वन्धुऋषिरोषधयो दे
वता अनुष्टुप् छन्दः अभिषेके विनियोगः। ॐ मुञ्चन्तुमाशपथ्यादथोवरुण्यादुत। अथोयमस्यपड्वीशात्सर्वस्माद्देव
किल्बिषात् ॥ ७ ॥ अवभृथेत्यस्य प्रजापति ऋषिर्यज्ञो देवता अनुष्टुप् छन्दः अभिषेके विनियोगः। ॐ अवभृथ
निचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पाहि ॥ ८ ॥ तत

दतलपर्य्यन्ताङ्गान्यनुलिम्पेत्। मानस्तोक इति मन्त्रस्य कुत्सऋषिः रुद्रो देवता जगतीछन्दः अङ्गानुलेपने विनियोगः। ॐ मानस्तोके तनये मानऽआयुषि मानो गोषु मानोऽअश्वेषुरीरिषः। मानोव्वीरान् रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्वाह वा महे। उदकं स्पृशेत्। ततो गोमयलिप्तएव वक्ष्यमाणैरष्टभिर्मन्त्रैः प्रतिमन्त्रं कुम्भमुद्रयादक्षिणचुलकेन वा शिरोभिषिञ्चेत्॥ दत्वाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु। सावकाशामेकमुष्टिं कुर्यात् सा कुम्भमुद्रिकेति मन्त्रा यथा। इमम्मे वरुणेति मन्त्रस्य शुनःशेप ऋषिर्वरुणो देवता गायत्री छन्दः। अभिषेके विनियोगः। ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके॥ १॥ तत्त्वायामीति मन्त्रस्य शुनःशेप ऋषिर्वरुणो देवता त्रिष्टुप् छन्दः। अभिषेके विनियोगः॥ ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेह बोध्युरुशꣳस मानऽआयुःप्रमोषीः॥ २॥ त्वन्न इति मन्त्रस्य वामदेव ऋषिः अग्नीवरुणौ देवते त्रिष्टुप् छन्दः अभि०। ॐ त्वन्नोऽअग्ने व्वरुणस्यविद्वान् देवस्यहेडोऽअवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो व्विश्वा

हस्तस्वया नाभेरधः पादपर्यन्तानि ॥ इदं विष्णुरिति॰ मेधातिथिऋषिर्विष्णुर्दे॰ गाय॰ । अनुलेपने॰ । ॐइदं विष्णुर्विचक्र
मे त्रेधानिदधेपदं समूढमस्यपांऽ सुरेस्वाहा । स्नाने कर्मणिकंडिकाल्लोमन्त्रः सर्वत्र ॥ तथा चरणः । गृह्यकर्मसुयेम
न्त्राश्चे या स्वाध्यायपाठतः ॥ किन्त्व मध्यमष्टत्यास्तेनद्रुता न विलंबिता इति ॥ तडागादिषु तोयेषु प्रत्यकं स्नानमा चरे
दिति । नद्यादौतु प्रवाहाभिमुखोवा स्नानमाचरेत् । तथाच नरसिंह पुराणे । नद्यांस्रवत्सु चस्नायात् प्रतिस्रोतः स्थि
तो द्विजः । यायाससमुद्रगानद्यस्तासु स्नानंतुयन्मुखं । सर्वेपिशाखिनःकुर्युर्विना वाजसनेयिना इति विशेष वाक्यान्महा
नद्यां सूर्याभिमुखं स्नानंयुक्तं वाजसनेयिनां । ततः सूर्याभि मुखः स्थित्वाऽआपोअस्मानित्यादि देवीरित्यंतेन निमज्जेत् ॥
आपो अस्मानिति मन्त्रस्य प्रजापति ऋषिरापोदे॰ । अत्यष्टिछंदः मज्जनोन्मज्जनेवि॰ । ॐआपो अस्मान्मातरः शुन्धयन्तु
घृतेननो घृतप्वः पुनन्तु ॥ विश्वहिंरिप्रम्प्रवहन्तिदेवीः । तत उदिदाभ्यऽइत्यादि पूतएमीत्यंतेनोन्मज्जेत् ॥ ॐउदि
दाभ्यः शुचिरापूतऽएमि । पुनस्तूष्णी न्निमज्यो न्मज्या चामेत् । ततः पाणिभ्यांगो मयदाय पूर्वं स्वल्लेपनव ल्ललाटादिपा

सहस्रंयज्ञियाःपाशाविततामहान्तः। तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा॥ २। इति मन्त्रेण जलंदक्षिण हस्तेन दक्षिणावर्त्तमा लोडयेत्। ततः सुमित्रियेत्यनेनपूर्णां जलिनापोगृहीत्वा दुर्मित्रियेत्यनेन यस्यांदिशिद्वेष्टास्ति तस्यांदिशि द्वौविक्रमावुदङ्गत्वाद्वेष्टारं मनसाविचिंत्य तटेंजलिं प्रक्षिपेत्। द्वेष्टु रभावेकामादीन् स्मृत्वांजलिं प्रक्षिपेत्॥ सुमित्रियान इति मन्त्रस्य प्रजापति ऋषिरापोदे०। यजु ग्रंहणेवि०। ॐ सुमित्रियान आप ओषधयः सन्तु। दुर्मित्रियेत्यस्य प्रजापति ऋषिरापोदे०। यजु अञ्जलिप्रक्षेपेवि०। दुर्मित्रियास्तस्मै सन्तुयोस्मान्द्वेष्टियञ्चवयंद्विष्मः। अभिचारकेऽपस्पृशेत्। द्वितीयभागेनकक्ष्यादीनामनुलेपनं। मृदंवामकरेणादायोभयकटिमनुलिप्याङ्घ्रिः प्रक्षाल्य तथैव पुनर्द्विर्लेपन प्रक्षालने कुर्यात्। तथैव वस्तिं ऊरूजङ्घे। चरणौ करौच मृदा प्रत्येकं तूष्णींलिस्त्रिः प्रक्षाल्याचम्यतीर्थो दकायनम इति काय वाङ्मनोभि स्तीर्थो दकंनमस्कुर्यात्। ततस्तृतीय भागेनमृदा इदं विष्णुरितिमन्त्रेण दक्षिणपाणि गृहीतया मृदाललाटादिनाभि पर्यंतानि गात्राण्यनुलिंपे। वाम

पिवेत् ॥ ततोंगुष्ठ मूले नमुखं द्विः प्रमृज्यां गुष्ठमूलं प्रक्षाल्य खानिसंस्पृशेत् ॥ तद्यथा ॥ तर्जनी मध्यमाना मिका भिरास्यं ॥ अंगुष्ठ तर्जनीभ्यां नासारन्ध्रद्वयं ॥ आदौ दक्षिणं ॥ ततोवामं ॥ अनामिकांगुष्ठाभ्यां चक्षुषी ताभ्या मेवश्रोत्रे ॥ अंगुष्ठ कनिष्ठिकाभ्यां नाभिं ॥ पाणितलेन हृदयं ॥ संकुचितकराग्रेण स्कन्धद्वयं ॥ एवंशीर्षं ॥ एवं स्नात्वा च मनं विधाय सङ्कल्प्य कुर्वीत् देशकालौ सङ्कीर्त्योत्सर्गाख्ये कर्मणिस्नानविधिना ॥ स्नानं कुर्वे ॥ अत्र प्रणवपूर्वका मन्त्राःपठनीयाः ॥ तदुक्तं दाल्भ्यपरिशिष्टे ॥ ब्रह्मयज्ञो जपोहोमोदेवर्षि पितृकर्म च ॥ अनोंकृत्यकृतं सर्वन्न भवेत्सिद्धिकारकं ॥ १ ॥ तत उरुंहीत्यस्यशुनः शेप ऋषिर्वरुणो देवता त्रिष्टु० ॥ जला- भिमन्त्रणे विनियोगः ॥ ॐ उरुंहि राजावरुणश्चकारसूर्याय पन्थाम न्वेतवाउ ॥ अपदेपादाप्रति धातवेकरुतापव- वक्ताहृदयाविधश्चित् । नमोवरुणायाभिष्ठितोवरुणस्यपाशः । १ । इति मन्त्रेण तोयमामन्त्रयेत् । ततोयेतेशत मिति मन्त्रस्य वामदेवऋषि र्वरुणसवितृविष्णुविश्वमरुत्स्वर्का देवताः । त्रिष्टु० । तोयावर्तनेवि० । ॐ येतेशतंवरुणये

तानां यातया मत्वनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सशिष्योहमुत्सर्जनाख्यं कर्मकरिष्ये ॥ तदंगत्वेन गणपति पूजन मातृकापूजनाभ्युदयिकश्राद्धानि करिष्ये ॥ तत्सर्वं गणपत्यादिपूजनं यथोक्तविधिना सम्पादयेत् ॥ ततः स्नानतर्पणपूजोपकरणानि मृदादीनि गृहीत्वा ग्रामात्प्राग्वोदग्वादिशि शिष्यैः सह नद्यादिरम्यं जलाशयंप्रति गच्छेत् ॥ देवखाता लाभे चतुरः पिण्डानुद्धृत्य पारक्येपि जलाशये स्नानमाचरेदित्य पिवोद्धव्यं ॥ ततस्तीरं प्रक्षाल्य शुभ्रांमृदं आर्द्रंगोमयं कुशान् तिलानक्षतान् सुरभीणि पुष्पाणि दूर्वामपामार्गं ऋषिस्थापनार्थंपीठं ऋषि पूजनार्थं गन्ध धूपार्थसुगन्धिद्रव्य घृतदीप नानाविधनैवेद्यानि वर्षोद्भवानिफलानि पूगीफलानि यज्ञोपवीतानि पृथक्२ स्थापयेत् ॥ प्रथमभागेन मृदापाणिपादानुलेपनं ॥ ततः प्रक्षालितपाणिपादः सपवित्रकरःबद्धत्रिकच्छ शिखःधृत वामस्कन्ध वस्त्रस्तत स्थले जले चैकैकंपादं कृत्वोप विश्य बाहूजान्व तराकृत्वा मुक्तां गुष्ठकनिष्ठिकेन दक्षि णहस्तेन फेनबुद्बुदवर्जं स्वच्छमाषमज्जनपरिमितं जलमादायां गुष्ठमूलस्थ ब्राह्मेण तीर्थेन शब्दमकुर्वन्त्रिः

स्नातव्यं विधिवत्तते त्वुक्तं त्वा यथाविधि स्नानप्रयोगो निरूप्यते ॥ तत्रायं प्रकारः ॥ अयं नित्यस्नानस्य कालाप
कर्षण विधिः ॥ ननु का गीङ्गे त्वेन विधानं ॥ ततश्च तस्मिन्दिने प्रात्यह्निकं माध्याह्निकं स्नानं प्रातरेव कर्त्तव्यं ॥
न मध्याह्ने दैवकर्म त्वात् ॥ प्रथमं सशिष्याचार्यः प्रथम प्रयोगे गणपति पूजनपूर्वकं मातृकार्चनमाभ्युदयिकश्राद्धं
यथोक्तं कुर्वीत ॥ श्राद्धं गुरोरेव ॥ तथा च रेणुक दीक्षितः ॥ पौष मासस्य रोहिण्यां कृष्णाष्टम्यामथापिवा ॥
माघस्याद्यतिथौ तत्र पूर्वाह्ने फाल्गुनस्य वा ॥ उत्सर्गं विधिवत्कुर्याज्जलान्ते छंदसांवहिः ॥ नाङ्गानां मातृपूजादि
श्राद्धं कृत्वा गुरुःसहेति ॥ शुद्धे वाससी परिधाय कृतकुशोपग्रहः ॥ कृत प्राणायामो दक्षिण पाणिना गृहीत
वारि कुसुम यव कुंकुमो देशकालौ संकीर्त्य ॥ उरस्य ॥ कंठ्य ॥ तालव्य ॥ मूर्द्धन्य दन्त्य ॥ ओष्ठ्य ॥ नासिक्य ॥
कंठ्यनासिक्य ॥ तालव्यनासिक्य ॥ मूर्द्धन्यनासिक्य ॥ दन्त्यनासिक्य ॥ ओष्ठ्यनासिक्य ॥ कंठ्यतालव्य ॥ कंठ्योष्ठ्य ॥
दन्त्योष्ठ्य ॥ जिह्वामूलीयोपध्मानीय ॥ ह्रस्वदीर्घप्लुत स्वरद्विर्भावपरसवर्णविश्लिष्टानां छंदसा मधीतानामध्यायि

कालौसंकीर्त्यउत्सर्गाङ्गभूतं ऋषिश्राद्धमहङ्करिष्ये ॥ ॐ इदंविष्णुरितिदिग्बन्धः ॥ ऋषिश्राद्धोपहराःशुचयोभवन्त्वि त्युपहारप्रोक्षणं ॥ देशकालपात्रद्रव्यश्रधासम्पदस्तु ॥ गोतमादिसप्तऋषीणामिदमासनं यथायथाविभागंवः स्वाहा॥ गोतमादयः सप्तऋषयोयथादत्तं गन्धाद्यर्चनं यथाविभागंवः स्वाहा ॥ गन्धादिदानं ॥ ऋषिश्राद्धसाङ्गतासिध्यर्थं सप्त संख्यकान् ब्राह्मणान् यथाकालेयथा सम्पन्नान्नेनतर्पयिष्ये ॥ तेनगोतमादयःसप्तऋषयः प्रीयन्तां ॥ ऋषिश्राद्धसांगता सिध्यर्थं हिरण्यनिष्क्रयभूतां दक्षिणां मनसोद्दिष्टामाचार्याय सम्प्रददे ॥ आचार्यः कोदादिति कामस्तुतिं पठेत् ॥ ॐ कोदात्कस्मा ऽअदात्कामोदात्कामायदात् ॥ कामोदाताकामःप्रतिग्रहीताकामैतत्ते ॥ १ ॥ उपविष्टेषु ब्राह्मणेषूदका दिदानं ॥ तद्यथा ॐ शिवाआपःसन्तु ॥ ॐसौमनस्यमस्तु ॥ अक्षतञ्चारिष्टं चास्तु ॥ अघोराऋषयः सन्तु ॥ सर्वत्रसन्त्विति विप्राः प्रतिवचनं दद्युः ॥ उत्सर्गकर्मणोन्यूनातिरिक्तदोषपरिहारार्थं नानागोत्रेभ्यो नानाशर्मभ्यो विप्रेभ्यो भूयसींदक्षिणां सम्प्रददे ॥ अद्येत्यादिगुणविशिष्टे काले देशे च ॥ छन्दसामुत्सर्गाङ्गभूतऋषिश्राद्धं परि

समूलत्वादयमेव पक्षः ॥ श्रेयस्करः ॥ वनस्थोपीदं कुर्वीत ॥ तदुक्तं प्रयोगपारिजाते ॥ उपाकर्मोत्सर्जनञ्च वन
 स्थानामपीष्यते ॥ धारणाध्यापनां गत्वा गृहीणां ब्रह्मचारिणामिति ॥ उत्सर्गाकरणे दोषः श्रूयते ॥ उत्सर्जनञ्च
वेदानामुपाकर्मतथैव च ॥ अकृत्वावेदजाप्येन फलमाप्नोति मानवः ॥ १ ॥ सूत्रकारिकयोर्भाष्यं विलोक्यपद्धतिः कृता
कर्मठानां प्रबोधाय कान्हदेवद्विजन्मना ॥ २ ॥ खनेत्रवसु भूवर्षे माधवेजाह्नवीतोथौ ॥ त्रैविद्यमोढसंज्ञेन काशी
पुरनिवासिना ॥ ३ ॥ कान्हदेवात्मजेनैषा कृष्णदेवेन धीमता ॥ कान्हदेवाकृतिः साध्वीशोधिताविदुषांमुदे ॥ ४ ॥
इति ऋषिपूजनंसमाप्तम् ॥

शहर कलकत्ता महल्ला निमतलामे श्रीभुवनचन्द्र वसाकके ज्ञानरत्नाकर यन्त्रालयमे
सम्वत् १९२३ मिति श्रावण वदि ३ तृतीया सोमवारको यन्त्रित हुआ ॥

सर्जयेत्॥ एवमुत्सर्गं विधायत्रिरात्रं गुरुगृहे सर्वे शिष्या निवसेयुः ॥ तत्र सूत्रं ॥ त्रिरात्रं सहोष्यविप्रतिष्ठेरन्नि
ति। सूत्रार्थः ॥ ततः सर्वेगुरुगृहंत्रिरात्रमुषित्वा स्वस्वगृहं गच्छेयुः ॥ अन्यच्च० त्रिरात्रं नाधीयीरं लोमनखानामनिक्र
न्तनञ्च ॥सूत्रार्थः ॥उत्सर्गोत्तरं त्रिरात्रमध्ययनं न कुर्युः ॥ तथानखलोम्नांनिक्रतनञ्च ॥ एकेप्रागुत्सर्गात्। एवंप्रकारेणो
दमुत्सर्गाख्यंकर्मप्रतिवर्षमनुष्ठेयं ॥ नित्यत्वात्। तथाच कात्यायनः। प्रत्यब्दं यदुपाकर्मसोत्सर्गं विधिवद्द्विजैः ॥ क्रियते छ
न्दसांतेन पुनराप्यायनं भवेत् ॥१॥ अस्थानोच्चारविच्छेदघोषणाध्यापनादिकं ॥ प्रामादिकं श्रुतोयत्स्याद्यातयामत्वका
रितत् ॥२॥ अयातयामैश्छन्दोभिर्यत्कर्मक्रियते द्विजैः ॥ क्रीडमानैरपि सदात्तत्तेषां सिद्धिकारकमिति ॥ ३ ॥ उत्स
र्गोत्तरं पुनरुपाकरणंयावच्छुक्लकृष्णाव्यवस्थयामन्त्र ब्राह्मणयोरध्ययनं ॥ अङ्गानां च ॥ तदुक्तं मिताक्षरायां ॥ यथा
शास्त्रन्तु कृत्वैव मुत्सर्गं छन्दसां वहिः ॥ विरमेत्पक्षिणीं रात्रीं यद्वाप्येकमहर्निशमिति ॥ अतऊर्द्ध्वं तु छन्दांसि शुक्लेषु
नियतः पठेत् ॥ वेदांगानि तु सर्वाणि कृष्णपक्षेषु सम्पठेदिति ॥ तत्र शुक्लेषु छन्दांसि कृष्णपक्षेष्वङ्गानीति विवेकः

पूर्णमस्तु ॥ अस्तु परिपूर्णमिति विप्राः ॥ प्रतिवचनं दद्युः ॥ ततः सहनोस्तु सहनोवतु सहन इदंवीर्यवदस्तु
ब्रह्म ॥ इन्द्रस्तद्वेदयेनयथान विद्विषामह इति ॥ उभाकवीत्यस्य प्रजापतिर्ऋषिः ॥ अश्विनौ देवते जपेविनि
योगः ॥ उभाकवीयुवायोनोधर्मः परापतत् ॥ परिसख्यस्यधर्मिणोव्रिसख्यानिविसृजामहइति च ॥ सर्वे जपे
युः ॥ विरतास्मेति प्रब्रूयुः ॥ ततो ऋषीन्विसर्जयेत् ॥ तत्र रेणुकारिका ॥ ततो विसर्जनं कुर्युरुत्तिष्ठ ब्रह्मणस्पत
इति ॥ उत्तिष्ठेति घोरकण्वऋषिर्बृहती छन्दः ॥ ब्रह्मणस्पतिर्देवता ॥ सप्तर्षिविसर्जने विनियोगः॥ ॐउत्तिष्ठब्रह्म
णस्पतेदेवयन्तस्त्वेमहे ।। उपप्रयन्तुमरुतःसुदानवऽइन्द्रप्राशूर्भवासचा ॥ १ ॥ ततः समाचारात्समुद्रं गच्छेति सप्तर्षीन्
जलाशये स्नावयेत् ॥ ॐ समुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳ संवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाहो
रात्रेगच्छस्वाहाच्छन्दां ॐ सिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वा
हाग्निंवैश्वानरङ्गच्छस्वाहा मनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिःपृथिवीम्भस्मनापृणस्वाहा स्वस्वप्रवरान्वि

मात्रस्वरूपं नारायणं स्मृत्वा मध्याह्नसन्ध्योपासनमारभेत् ॥ तत्रैवं क्रमः ॥ अथ मध्याह्नसन्ध्या । तत्र विशेषः ॥ उपात्तदुरितक्षयद्वारा रुद्रावाप्त्यै मध्याह्नसन्ध्योपासनमहं करिष्ये ॥ आगच्छ वरदे देवी त्र्यक्षरे रुद्रवादिनि ॥ सावित्री छन्दसांमातः रुद्रयोने नमोऽस्तुते ॥ १ ॥ पूर्वं मध्याह्नसन्ध्यास्वरूपं विभावयेत् ॥ तदित्थं ॥ मध्याह्नसन्ध्याश्वेतपद्माश्वेतासनस्था श्वेतांबरा श्वेतवर्णाश्वेतमाल्यानुलेपना पञ्चमुखीदशभुजा त्रिनेत्रा त्रिशूलाक्षमाला कमण्डलुकपालधारिणी सर्वाभरणभूषिता सावित्री युवती वृषभवाहिनी यजुर्वेदसहिता रुद्रदैवत्यात्रिपदाषट्कुक्षिः पञ्चशीर्षाग्निमुखारुद्रशिखा विष्णुहृदया ब्रह्मकवचासांख्यायन सगोत्रा शुक्लवर्णाकर्मध्याने विनियोगः ॥ ततः प्राणायामं कुर्यात् ॥ सयथा ॥ ॐकारस्य ब्रह्माऋषिर्गायत्री छन्दः । परमात्मा देवता प्राणायामे विनियोगः ॥ सप्तव्याहृतीना प्रजापति विश्वामित्र जमदग्नि भरद्वाज गोतमात्रि वशिष्ठ कश्यपाऋषयः अग्निवायुसूर्यबृहस्पति वरुणेन्द्र विश्वेदेवा देवता गायत्र्युष्णिगनुष्टुप् बृहती पंक्ति त्रिष्टुप् जगत्यश्छन्दांसि प्राणापामे विनियोगः ॥ तत्सवितुरिति विश्वामित्र ऋषिः

द्भिर्निष्क्राम्य वक्ष्यमाणलक्षणे वाससी परिधाय वक्ष्यमाणलक्षणासने प्राङ्मुखोवोदङ्मुख उपविशेत् ॥ ततो गङ्गादि
तीर्थमृत्तिकया गार्हपत्यौपासनाग्निभस्मना वा गोपीचन्दनेन वा यथाधिकारी भाले त्रिपुण्ड्रमूर्द्ध्वपुण्ड्रं वा तिलकं कुर्यात्
ब्रह्माण्डपुराणे ॥ ऊर्द्ध्वपुण्ड्रं द्विजः कुर्यात् क्षत्रियस्तु त्रिपुण्ड्रकं ॥ अर्द्धचन्द्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु ॥ १ ॥
दग्धं जीर्णञ्च मलिनं मूषकापहृतं तथा ॥ खादितं गोमहिष्याद्यैस्त्याज्यं सर्वथा द्विजैः ॥ २ ॥ परिधानवस्त्रल
क्षणं ॥ अरजकप्रक्षालिते सदशे शुष्के अनग्निदग्धे अच्छिद्रे अस्यूते गैरिकादिरागेनाविकृते शुक्ले कार्पासनिर्मिते
परिधानीयोत्तरीये धारयेत् ॥ ततो द्विराचामेत् ॥ जीवत्पितृकेनोत्तरीयं न धार्यं ॥ उत्तरीयं योगपट्टन्तर्जन्यां
रजतं तथा । न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदीति वचनात् ॥ ततः कटेरधस्ताजादानूरूमृदानुलिप्य प्रक्षा
ल्यदनन्तरं मणिबन्धादङ्गुल्यग्रपर्यन्तौ पाणीमृदानुलिप्य प्रक्षालयेत् ॥ आसनलक्षणं ॥ श्रीपर्ण्यादिप्रशस्तदारुनि
र्मितं कुशलयाक्रान्तं निधापयेत् ॥ ततः कुशपवित्रोपग्रहपाणिः पादौ जलेस्थले कृत्वा पूर्ववत् द्विराचम्य भगवन्तं पर

तिसृणां सिन्धुद्वीप ऋषिरापो देवता गायत्री छन्दः मार्ज्जने विनियोगः ॥ ॐ आपोहिष्ठामयो भुवः शिरसि ॥ १ ॥ ॐ तानऽऊर्ज्जे दधातन ॥ पादयो ॐ महेरणाय चक्षसे हृदये ॥३॥ ॐ योवः शिवतमोरसः हृदये ॥ ४ ॥ ॐ तस्य भाजयतेहनः पादयोः ॥ ५ ॥ ॐ उशतीरिव मातरः शिरसि ॥ ६ ॥ ॐ तस्माऽअरंङ्गमामवः शिरसि ॥ ७ ॥ ॐ यस्य क्षयाय जिन्वथहृदये ॥ ८ ॥ ॐ आपोजनयथाचनः पादयोः ॥ ९ ॥ तथाच स्मृतिः ॥ आपोहिष्ठेत्यृचैः कुर्यान्मार्जनन्तु कुशोदकैः ॥ प्रणवेन तु संयुक्तं क्षिपेद्वारिपदेपद इति ॥ ततश्चुलुकेन जलमादाय तस्मिन्नासिकाग्रं निधाय द्रुपदादिवेति ऋचं पठित्वा तज्जलं भूमावुत्सृज्यपुष्पाणि फलानि चांबुमिश्राण्यञ्जलिनादायोत्थाय प्रणवव्याहृतिपूर्विकयागायत्र्यैकाञ्जलिं सूर्याभिमुखमुत्क्षिपेत् ॥ ततऊर्ध्वबाहुः सूर्यमुदीक्षमाणो वक्ष्यमाणैर्मन्त्रैः सूर्योपस्थानं कुर्यात् ॥ तत्र मन्त्रा यथा ॥ उद्वयमिति प्रस्कण्व ऋषिः सूर्यो देवता अनुष्टप् छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ उद्वयन्तमसस्परि स्वःपश्यन्तऽउत्तरम् ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमम् ॥ १ ॥ उदुत्यमिति प्रस्कण्व ऋषिः

सविता देवता गायत्री छन्दः प्राणायामे विनियोगः ॥ आपोज्योतिरिति प्रजापति ऋषिः ब्रह्माग्निवायुसूर्या देवता द्विपदागायत्री छन्दः प्राणायामे विनियोगः एवं ऋष्यादिकं स्मृत्वा बद्धासनोमौनीसम्मिलितनयनो दक्षिणपाण्यङ्गुष्ठेन दक्षिणनासिकां पीड़यन्तथा कनिष्ठिकानामिकाभ्यामुत्तरनासिकां पीड़यन्मध्यमातर्जन्यौ मुञ्चन् सव्याहृतिकां सप्रणवां सशिरसांगायत्रीं पूरककुम्भकरेचकक्रमेण त्रिःपठेत् ॥ ॐभूः। ॐभुवः। ॐस्वः। ॐमहः। ॐजनः ॐतपः ॥ ॐसत्यं ॥ ॐतत्सवितु० रोम् ॥ इति मन्त्रान्नवधाष्टत्यमनसा पठेत् ॥ तत आपः पुनन्त्वित्याचमनं कुर्यात् ॥ आपः पुनंत्विति मन्त्रस्य कश्यपऋषिरापो देवता अनुष्टुप् छन्दः आचमने विनियोगः ॥ ॐ आपः पुनन्तु पृथिवीं पृथ्वीपूतापुनातु मां ॥ पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां ॥ यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम ॥ सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहꣳ स्वाहेति मन्त्रेण सकृदप आचम्य स्मार्ताचमनं कृत्वा साग्रान् कुशान्दक्षिणपाणौ धृत्वापोहिष्ठेत्यादितृचेन नवभिः पादैः प्रतिपादं शिरो हृदयपादयुगलानि मार्जयेत् ॥ आपोहिष्ठेति

त्वष्टादेवता त्रिष्टुप् छन्दः मुखमार्जने वि० ॥ ॐ संवर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टासुद त्रोविदधातुरायोनुमार्ष्टुतन्वोजद्विलिष्टम् ॥ देवागात्विति मन्त्रस्य वाचस्पति ऋषिर्वातो देवता विराट् छन्दः कर्म्माङ्ग देवता विस० ॥ ॐ देवागातुविदोगातुंवित्वागातुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ॥ एवंविधिनाजी वत्पितृकेनापि ब्रह्मादिचित्रगुप्तपर्यन्तं तर्पणं कृत्वा स्वपित्रादितर्पणं वस्त्रनिष्पीड़नञ्च वर्जयित्वा ब्रह्मार्चनादिस्नाना दिकर्म्माङ्गभूतदेवता विसर्जनपर्यन्तंतर्पणविधिः विधेयः । न जीवत्पितृकः कुर्य्याद्वस्त्रनिष्पीड़नं बुध इति । न जीवत् पितृकः कुर्यात् कृष्णैस्तिलैश्च तर्तणमितिलौगाक्षिवचनात् ॥ वस्त्रनिष्पीड़नं पर्व्वादौ न भवति । द्वादश्यां पञ्चदश्यां च संक्रान्तौ श्राद्धवासरे ॥ वस्त्रनिष्पीड़येन्नैव नच क्षारेण योजयेदिति स्मृतेः ॥ केचित्तूत्तर ऋषितर्पणविधानात् स्नानोत्तरतर्पणमध्ये वस्त्रनिष्पीड़नं नेच्छन्ति ॥ योगीयाज्ञवल्क्यवचनात् । यावद्देवानृषींश्चैव पितृंश्चैव न तर्पयेत् ॥ तावन्नपीड़येद्वस्त्रं येन स्नातो नवोदके ॥ निष्पीड़यति यः पूर्वं स्नानवस्त्रमतर्पिते ॥ निराशाः पितरो यान्ति शापं

दत्वा सुदारुणमिति निषेधवचनात्तदनुचितं। वस्त्रनिष्पीडनविषये यन्निषेधवचनं तत्तद्विधिशेषतातद्विषयमेवेति प्रतीतत्वाद्वस्त्रनिष्पीडनं स्नानोत्तरतर्पणमध्ये एवकुर्यादिति श्रीदीक्षितकामदेवकृतोत्सर्गकारिकाटिप्पणे प्रतिपादितं॥ केचित् स्नानकर्माङ्गभूतदेवताविसर्जनमत्रनेच्छन्ति तदप्ययुक्तं॥ युक्तंतु स्नानविधेः कर्मान्तरत्वाद्विसर्जनस्य तद्देवता विषयत्वात्सविसर्गं स्नानविधिं समापयेदित्यपि कामदेवदीक्षितकारिकाटिप्पणे प्रतिपादितं॥ एवमुक्तविधिनानित्य स्नानमध्याह्निकसन्ध्यातर्पणानि समाप्य वक्ष्यमाणप्रकारेणारुन्धतीसहितान् गोतमादीन् सप्तर्षीन् स्वप्रवरान् स्थापयेत्॥ इति श्रीद्विवेदीगुणदेवात्मजवेदशास्त्रविद्विवेदिकान्हदेवविरचिता त्रिकण्डीकासूत्रोक्तनित्यस्नानपद्धतिः समाप्तिमगात् श्रीरस्तु॥

शहर कलकत्ता महल्ला निमतलामे श्रीभुवनचन्द्र वसाकके ज्ञानरत्नाकर यन्त्रालयमे

सम्वत् १९२३ मिति श्रावण वदि ३ तृतीया सोमवारको यन्त्रित हुआ॥

स्ना० वि० ब्रह्माऋषिः परमात्मा देवता गायत्री छन्दः व्याहृतीनां प्रजापति ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभ
॥१२॥ श्छन्दांसि। तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः गायत्री जपे विनियोगः। ॐ भूर्भुवः
स्वः। तत्सवितु० ॥ ५ ॥ इति दशावरांशतमध्यां सहस्रपरमां वा जपेत्। ततो विभ्राड़ित्यनुवाकपुरुषसूक्त
शिवसंकल्पमण्डलब्राह्म णैः सूर्य्यमुपतिष्ठेत् ॥ तथा विभ्राडित्यस्य विभ्राट् सौर्य ऋषिः सूर्योदेवता त्रिष्टुप् छन्दः
उदुत्यमिति तिसृणां प्रस्कण्व ऋषिः सूर्योदेवता गायत्री छन्दः। तं प्रत्नथेत्यस्य काश्यपावत्सा ऋषी सोमो
देवता त्रिष्टुप् छन्दः। अयं वेनइत्यस्य वेन ऋषिः सोमो देवता त्रिष्टुप् छन्दः चित्रमित्यस्य कुत्साङ्गिरस ऋषिः
सूर्यो देवता त्रिष्टुप् छन्दः ॥ आन इत्यस्य अगस्त्य ऋषिः सूर्यो देवता त्रिष्टुप् छन्दः ॥ यदद्येत्यस्य श्रुतकक्ष
सुतकक्षावृषी सूर्यो देवता गायत्री तरणिरित्यस्य प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छन्दः ॥तत् सूर्यस्येतिद्वयोः
कुत्स ऋषिः सर्यो देवता त्रिष्टप् छन्दः ॥ वण्महानिति द्वयोर्जमदग्निर्ऋषिः सूर्यो देवता त्रिष्टुप् छन्दः आद्यस्य

राम
॥१२॥

सूर्यो देवता गायत्री छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः ॥ दृशे विश्वाय सूर्यम् ॥ २ ॥ चित्रं देवानामिति कुत्साङ्गिरस ऋषिः सूर्यो देवता त्रिष्टुप् छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ चित्रं देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी ऽअन्तरिक्षꣳ सूर्य ऽआत्मा जगतस्तस्थुषश्च ॥ ३ ॥ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः सूर्यो देवता ब्राह्मीत्रिष्टुप् छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ ४ ॥ अथ ध्यानं ॥ ॐ तरुणार्कमण्डलमध्यस्थां युवतीं सर्वशुक्लां पञ्चवक्त्रामग्निनेत्रामिंदुकलाविभूषणां त्रिशूलखड्गखट्वाङ्गडमरुं कुशचतुर्भुजां वृषभासनस्थां रुद्रदैवत्यां यजुर्वेदमुदाहरन्तीं भूर्लोकाधिष्ठात्रीं सावित्री नामदेवतां ॥ ध्यात्वा यथाशक्तिर्जपेत् । तेजोसीति परमेष्ठी प्रजापतिर्यजुराज्यं देवता गायत्र्यावाहने विनियोगः । ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥ १ ॥ प्रणव स्वव्

मा०वि० स्युपंच॥७॥ आनः आनऽइडाभिर्विदथे सुशस्तिविश्वानरः सविताद्देवऽएतु ॥ अपियथायुवानोमत्सथानोविश्वञ्जगदभि
॥ १३ ॥ पित्वेमनीषा ॥ ८ ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्रतेवशे ॥९॥ तरणिर्विश्वदर्शतः तरणिर्विश्वदर्श
तोज्योतिष्कृदसिसूर्य ॥ विश्वमाभासिरोचनम् ॥१०॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तोर्विततꣳसञ्जभार॥ यदेद
युक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ ११ ॥ तन्मित्रस्य॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपंकृणुतेद्यो
रुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसम्भरन्ति॥१२॥वण्महान् ॥ वण्महाँऽअसिसूर्य्यबडादित्यमहाँ२ ॥
असि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ ॥असि॥१३॥ बट्सूर्य्यश्रवसामहाँ२ ॥असिसत्रादेवमहाँ२ ॥असि
महादेवानामसुर्य्यः पुरोहितोविभुज्योतिरदाभ्यम् ॥१४॥ आयन्तऽइवसूर्य्यम् आयन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥
वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम॥१५॥ अद्यादेवाः अद्यादेवाऽउदितासूर्यस्यनिरꣳहसःपिपृतानि राम
रवद्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ॥१६॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्न ॥१३॥

बृहती छन्दः द्वितीयस्य सतो बृहती छन्दः आयन्त इवेत्यस्य नृमेधा ऋषिः सूर्यो देवता बृहती छन्दः अद्यादेवा इत्यस्य कुत्सऋषिः सूर्यो देवता त्रिष्टुप् छन्दः ॥ आकृष्णेनेत्यस्य हिरण्यस्तूपांगिरसा ऋषी सूर्यो देवता त्रिष्टुप् छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ विभ्राड्बृहत् विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपतावविह्रुतम् ॥ वातजूतोयोऽअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति ॥ १ ॥ उदुत्यम् उदुत्यञ्जातवेदसन्देवम्वहन्तिकेतवः दृशेविश्वायसूर्यम् ॥ २ ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ ॥२ँ अनु ॥ त्वम्वरुणपश्यसि ॥ ३ ॥ दैव्यावध्वर्यू दैव्यावध्वर्यूऽआगतꣳ रथेनसूर्यत्वचा मध्वायज्ञꣳ समञ्जाथे॥ तम्प्रत्नथायम्वेनश्चित्रन्देवानाम् ॥ ४ ॥तम्प्रत्नथा॥ तम्प्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिम्बर्हिषदꣳ स्वर्विदम् ॥ प्रतीचीनम्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ॥ ५ ॥ अयम्वेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज्जरायूरजसोविमाने ॥ इममपाꣳसङ्गमेसूर्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥६॥ चित्रन्देवानाम् चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳ सूर्यऽआत्माजगतस्त

ष्ट्यां ॥ पौर्णमास्यं ताभिप्रायेणमाघ कृष्णाष्टम्यामित्यर्थः ॥ वेदस्येति ॥ वेद शब्देन मन्त्र ब्राह्मणयोरेवोत्सर्गः ॥
 नाङ्गानां ॥ छन्दोवत्सूत्राणीत्यादिना भेदावगमात् ॥ अत्र सूत्रोक्तकाले उत्सर्गाख्यं कर्मकर्तुमशक्तश्चेत् स्मृत्युक्त
कालेपि कुर्वीत् ॥ तत्रमनुः ॥ पुष्येतु छंदसां कुर्याद्वहिरुत्सर्जनं द्विजः ॥ माघ शुक्लस्य वा प्राप्ते पूर्वाह्ले प्रथमे
ह्नि ॥ १ ॥ कात्यायनः ॥ उत्सर्गश्च तदातिष्येकुर्यात्प्रौष्टपदेथवा ॥ तथा खादिरगृह्ये विशेषः ॥ पुष्ये तूत्सर्जनं
कुर्यादुपाकर्मदिनेथवेति ॥ पुष्येपुष्यमासे इति मदन रत्नकारेण व्याख्यातं ॥ उपाकर्मकालस्तु सूत्रकारेणोक्तः ॥
अथातोध्यायोपाकर्मौषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां श्रावणस्य पञ्चमीं हस्तेनवेति ॥ सूत्रार्थ
स्तुप्रयोगेस्फुटी भविष्यति ॥ क्वचिन्निषेधोप्युक्तः ॥ संक्रान्तौ ग्रहणेचैव सूतके मृतके पिवा ॥ गणस्नानन्न कुर्वीत
नारदस्य वचोयथा ॥ गणस्नान शब्देनोत्सर्गाख्यं कर्म ॥ अतएव स्मृत्यर्थसारे उक्तं ॥ कस्मिंश्चिद्दिने ग्रहण-
संक्रान्तिवर्जिते कार्यं ॥ कर्मणो न लोपः ॥ नोत्कर्ष इति ॥ इत्यमुत्सर्ग कालं निर्णीय यथा विधिप्रयोगं कुर्वीत

श्रीगणेशाय नमः ॥ कृष्णमूर्त्ति पदद्वन्द्वं निधाय हृदि मङ्गलं ॥ स्फुटं स्नानप्रयोगोऽयं यथामतिवितन्यते
तत्रोत्सर्गकालो निर्णीयते ॥ अत्र गृह्यसूत्रं ॥ पौषस्य रोहिण्यां मध्यमायां वाष्टकाया मध्यायानुत्सृजेयुरुदकान्त॥
ङ्गत्वेति ॥ सूत्रार्थः ॥ पौषमासस्य रोहिणी नक्षत्रयुक्ते ॥ अथवा मध्यमाष्टकायां ॥ पौष्यूर्द्ध्वाष्टम्या मध्या
यानुत्सृजेयु राचार्यशिष्या उत्सृष्टानां छंद सांपुनरुपा करणं यावत्तावन्न पठेयुरित्यर्थः ॥ अत्र कालांतर मप्युक्तं
गृह्यकारेण ॥ तथा च सूत्रं ॥ अर्द्धषष्ठान्मासान धीत्योत्सृजे युरर्द्ध सप्तमान्वेति ॥ सूत्रार्थः ॥ अर्द्धषष्ठान्मासान् ॥
अर्द्धः षष्ठोमासोयेषुतेर्द्ध षष्ठास्तान्सार्द्ध पञ्च मासानिति यावत् ॥ श्रावण्यामुपाकृतानि छन्दांसि माघ कृष्णामा
वास्या पर्यन्तमधीत्यो त्सृजेयुः ॥ अर्द्ध सप्तमान्वा ॥ अर्द्धः सप्तमो मासोयेषु तेर्द्ध सप्तमास्तान्सार्द्ध षण्मासा निति
यावत् फाल्गुण कृष्णामावास्या पर्यन्त मधीत्योत्सृजेयुरित्यर्थः ॥ तथा च सूत्रार्थकारिका ॥ पौष मासस्य
रोहिण्यां कृष्णाष्टम्यामथापिवा ॥ उदकान्तं समासद्य वेदस्योत्सर्ज्जनं वहिरिति ॥ दर्शान्ताभिप्रायेण पौषकृष्णा

इदानीं वहुत लोग श्रावणी कर्त्ते हैं जिन पद्धति योंके अनुसार कर्त्ते हैं उनका प्रमाण मिलता नहीं और वेदके मन्त्रादि कवीप्रायः शुद्ध नहीं होते इसवास्ते लक्ष्मीमिश्र राजन मिश्रने सूत्र कारिकाके अनुसार पद्धतीको वहुत शोधन करके कालिकापुरमे छपवाया है जो कुछ इसके उपयोगी मन्त्रादि कहैं सो सव लिखे हैं इसके लेने वालेको वाहरसे कुछ अपेक्षा नहीं रहेगी जिसको लेना होवे उसे कलकत्ता वड़ीवाजार सङ्गतगलीमे लक्ष्मीमिश्र अथवा राजनमिश्रके पासमिलेगी।

शहर कलकत्ता महल्ला नीमतलामे श्रीभुवनचन्द्र वैशाखके ज्ञानरत्नाकर यन्त्रालयमे

सम्बत् १९२३ मिति आषाढ़ सुदी ५ पञ्चमी सोमवार को यन्त्रित हुआ।

गोजाऽऋतजाऽअद्रिजाऽऋतंबृहत् ॥ ततः सूर्यं पूर्ववत्प्रदक्षिणीकृत्यादित्याय नम इति नमस्कृत्य वक्ष्यमाणैश्चतुर्थ्यन्तै
र्नाममन्त्रैः प्राच्यादिदिशस्तद्दिग्देवताश्च नमस्कुर्यात् ॥ ॐ प्राच्यै दिशेनमः ॥ ॐ इन्द्रायनमः ॥ ॐ आग्नेय्यै दि
शेनमः । अग्नयेनमः ॥ ॐ दक्षिणायै दिशेनमः । यमायनमः ॥ ॐ निरृत्यै दिशेनमः ॥ निरृतयेनमः ॥ ॐ
प्रतीच्यै दिशे० ॥ वरुणायनमः ॥ ॐ वायव्यै दिशे० । वायवेनमः ॥ ॐ उदीचै दिशे० ॥ सोमायनमः ॥ ॐ
ईशान्यै दिशे० ॥ ईशानायनमः ॥ ॐ ऊर्ध्वायै दिशे० ॥ ब्रह्मणेनमः । ॐ अवाच्यै दिशे० ॥ अनन्तायनमः ॥ इति
दिशो देवताश्च प्रणम्योपविशेत् ॥ ततो ब्रह्मादिवरुणपर्यन्तेभ्य एकैकस्मैनमस्कुर्यात् ॥ अथवा योगीयाज्ञवल्क्यमतेन
उदकाञ्जलिं दद्यात् ॥ सयथा ॥ ॐ ब्रह्मणेनमः ॥ अग्नये० पृथिव्यै० । ॐ ओषधीभ्यो० । वाचे० । वाचस्पतये०
विष्णवे० ॥ महद्भ्यो० ॥ आपांपतये० । ॐ वरुणायनमः । एवं नमस्कारं कृत्वोदकं दत्वाञ्जलिनाजलमादायसं
वर्चसेति मन्त्रेणमुखं संशोध्य देवागात्विति मन्त्रेण स्नानादिकर्माङ्गभूतदेवताविसर्जयेत् ॥ संवर्चसेति परमेष्ठी ऋषि

35

३ ॥ ॐ रुद्रायनमः ॥ अपांस्पर्शः ॥ तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः पूजने विनि० ॥ ॐ तत्सवितु० ॥४॥ ॐ सवित्रेनमः ॥ मित्रस्येत्यस्य विश्वामित्र ऋषि मित्रो देवता गायत्री छन्दः पूजने विनियोगः ॥ ॐ मित्रस्यंचर्षणीधृतोवे॑ देवस्यंसानसि ॥ द्युम्नंञ्चित्रश्रवस्तमम् ॥ ५ ॥ ॐ मित्रायनमः ॥ इमम्मेत्यस्य शुनःशेप ऋषि र्वरुणो देवता गायत्री छन्दः पूजने विनियोग ॥ ॐ इमम्मे॑ वरुणश्रुधीहवंमद्याचंमृडय ॥ त्वामवस्युराचंके ॥ ६ ॥ ॐ वरुणायनमः ॥ एवं ब्रह्मादिदेवानर्चयित्वोत्थायाद्दृश्रमस्यहꣳस शुचिषदित्येताभ्यां सूर्य्यमुपतिष्ठेत् ॥ अद्दृश्रमेत्यस्य प्रस्कण्व ऋषिः सविता देवता गायत्री छन्दः सूर्योपस्थाने वि० ॥ ॐ अद्दृश्रमस्यकेतवोविरश्मयोजना२ ँऽअनु ॥ भ्राजन्तोऽअग्नयंयथा ॥ उपयामगृहीतोसिसूर्यायत्वाभ्राजायैषतेयोनिःसूर्यायत्वाभ्राजाय ॥ सूर्य्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम् ॥ हꣳस सद्दित्यस्य वामदेव ऋषिः सविता देवता अतिजगती छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ हꣳस शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा

स्ना० वि० ॥२२॥

तिलमुदकं दद्यात् ॥ इत्यवसानाञ्जलिं दद्यात् । योगियाज्ञवल्क्यः ॥ वस्त्रनिष्पीडितं तोयं स्नातस्योच्छिष्टभागिनां ॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रि भागधेयं श्रुतिः प्राहतस्मान्नपीडयेज्जले ॥ ततः स्नानवस्त्रप्रान्तं निष्पीडयेत् ॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकं ॥ एवं स्नानवस्त्रं निष्पीड्यप्रागुदग्वा तर्पणार्थकुशान् परित्यज्य यज्ञोपवीतीभूत्वाचम्य जले ब्रह्मादिदेवानावाह्य वक्ष्यमाणैस्तत्तल्लिङ्गमन्त्रैर्यथासम्भवोपचारैश्चन्दनाक्षतपुष्पादिभिर्ब्रह्मादिवरुणान्तानर्च्चयेत् ॥ ते मन्त्रा यथा ॥ ब्रह्मयज्ञानमिति प्रजापतिरृषिरादित्यो देवता त्रिष्टुप् छन्दः पूजने वि० ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्च विवः ॥ १ ॥ ॐ ब्रह्मणेनमः । इदंविष्णुरिति मेधातिथिरृषिर्विष्णुर्देवता गायत्री छन्दः पूजने वि० । ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाᳪसुरेस्वाहा ॥ २ ॥ ॐ विष्णवे नमः ॥ नमस्त इत्यस्य परमेष्ठी ऋषिः रुद्रो देवता गायत्री छन्दः पूजने वि० ॥ ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥

दद्यात् ॥ अद्यकोगोत्रोस्मत्प्रमातामहो अद्यकः शर्मा तृ० धा इति प्रमातामहायाञ्जलित्रयं दद्यात् ॥ अद्यकोगोत्रोस्म
दृद्धप्रमातामहो अद्यकः० स्वधा इति वृद्धप्रमा० दद्यात् ॥ ततः अद्यकोगोत्रास्मन्मातामही असुकीदेवी तृप्य० धा ॥ इति
मातामह्यै० अद्यकोगोत्रास्मत्प्रमातामही असु० धा इति प्रमाता० ॥ अद्यकोगोत्रास्मदृद्धप्रमातामही असु० स्वधा इति
वृद्धप्रमातामह्यै० एकैकमञ्जलिं दद्यात् ॥ ततः आचार्यादीन्नामगोत्र स्वधाकारैस्तर्पयेत् ॥ आचार्यतत्पत्नीभार्यापुत्र
पितृव्यतत्पत्नीमातुलतत्पत्नीसुहृत्सख्यान्स्तर्पयेत् ॥ अद्यकोगोत्रोस्मद्गुरुरद्यकः शर्मा तृप्यतामिदं जलं तस्मै स्वधा ॥
अद्यकोगोत्रास्मद्गुरुपत्नी असुकीदेवी तृप्यतामिदं जलं तस्यै स्वधेत्यादि ॥ ततो ये बान्धवा बान्धवा वा येन्यजन्मनि
बान्धवाः ॥ ते सर्वे तृप्तिमायान्तु येचास्मत्तोयकांक्षिणः ॥ ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ॥ तेषां हि
दत्तमक्षय्यमिदमस्तु तिलोदकं ॥ आब्रह्मस्तम्बपर्यन्तं देवर्षि पितृमानवाः । तृप्यन्तु पितरः सर्वे मातृमातामहा
दयः । अतीतकुलकोटीनां सप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं । इति मन्त्रैः पृथक्पृथक्

भ्यो दद्यात्॥ ततो मातृतर्पणं कुर्यात् ॥ तथाचक्रममाह व्यासः ॥ पितृभ्यः प्रथमं दद्यात्ततोमातृभ्यऽएव च। ततोमाताम
 हानाञ्च तत्पत्नीनां ततो जलं ॥ मरीचिः॥ अन्तर्मातामहान् कृत्वा मातृणां यः प्रयच्छति॥ उदकं पिण्डदानञ्च नरकं
सतु गच्छति ॥ मातृतर्पणे विशेषः॥ यथा ॥ अद्को गोत्राऽस्मन्माता अमुकीदेवी तृप्यतामिदंजलं तस्यै स्वधा एवं द्विर्द
द्यात् ॥ अद्कोगोत्रास्मत्पितामही अमुकीदेवीतृप्य०अद्कोगोत्रास्मत्प्रपितामही अमुकीदेवी तृप्य०॥ इति वाक्येन मात्रा
दिभ्यस्त्रींस्त्रीनञ्जलीन् दद्यात् ॥ वृद्धशातातपः॥ मातृमुख्यास्त्रयास्तिस्रः स्तासां दद्याज्जलाञ्जलीन् ॥ त्रींस्त्रीनेव तथान्या
सांदद्यादेकैकमञ्जलिमिति ॥ ततो नमोव इत्यष्टानां प्रजापति ऋषिःरस शोषजीव स्वधा घोर मन्यु पितरो देवता पा
ठे विनि०॥ ॐनमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघो
रायनमोवःपितरोमन्यवेनमोवःपितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः॥ १ ॥
इतिपठित्वा ॥ अद्कोगोत्रोऽस्मन्मातामह अद्कः शर्मातृप्यतामिदं जलं तस्मै स्वधा ॥ इति मातामहायाञ्जलित्रयं

विश्वे देवा देवता गायत्री छन्दः सर्वेषां मन्त्राणां प्रसेकाख्ये कर्मणि वि० ॥ ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पि
तरः सोम्यासः ॥ असुं यऽईयुरवृकाऽऋतज्ञास्ते नोवन्तु पितरोहवेषु ॥१॥ ॐ अङ्गिरसो नः पितरो नवग्वाऽअथर्वाणो भृग
वः सोम्यासः ॥ तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥२॥ ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथि
भिर्देवयानैः ॥ अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् ॥ ३॥ ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्
स्वधास्थ तर्पयत मे पितॄन् ॥४॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधा
यिभ्यः स्वधा नमः ॥ अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ५ ॥ ये चेह पितरो ये च नेह याꣳ२श्च
विद्म याꣳ२ उ च न प्रविद्म ॥ त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व ॥ ६ ॥ मधु वाताऽऋतायते मधु क्षरन्ति
सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ ७ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता ॥ ८ ॥ मधु
मान्नो वनस्पतिर्मधुमाꣳ२ अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥ ९ ॥ ततः तृप्यध्वं त्रः ॥ ३ ॥ इत्यञ्जलित्रयं पित्रादि

स्ना० वि० ॥२०॥

दर्भेण तिलमिश्रितेन जलेन पित्रादिभ्य स्त्रींस्त्रीनञ्जलीन् दद्यात् ॥ अञ्जलि नियममाह व्यासः ॥ एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः ॥ अर्हन्तिपितर स्त्रींस्त्रीं स्त्रियस्त्वेकैकमञ्जलिमिति ॥ अदकोगोत्रोऽस्मत्पिता अदकः शर्मा तृप्यतामिदं जलं तस्मै स्वधा इत्येकाञ्जलिं दत्वैवमपरमञ्जलिद्वयं पित्रे दद्यात् ॥ ततश्चादकोगोत्रोऽस्मत्पितामह अदकः शर्मा तृप्यतामिदं जलं तस्मै स्वधा ॥ एवमपरमञ्जलिद्वयं पितामहाय दत्वा अदकोगोत्रोऽस्मत्प्रपितामह अदकः शर्मा तृप्यतामिदं जलं तस्मै स्वधा ॥ एवमपरमञ्जलिद्वयं प्रपितामहाय दत्वा ॥ ततः प्रसेकाख्यं कर्मकुर्यात् ॥ तद्यथा । उदीरतामित्यादिषडृचपर्यन्तं मधुवाता इति तृच पर्यन्तं यथाक्रमं मन्त्रानुपांश्वाम्नायस्वरेण पठन्नञ्जलिकृतापोजला धिकरणे प्रक्षिपेत् ॥ उदीरतामङ्गिरस आयन्तुन इति तिसृणां शङ्खः प्रजापतिर्ऋषिः पितरो देवता त्रिष्टुप् छन्दः ऊर्जमित्यस्य प्रजापति ऋषिरापो देवता विराट् छन्दः पितृभ्य इत्यस्य प्रजापत्यश्वि सरस्वत्य ऋषयः पितरो देवता यजूंषि येचेहेत्यस्य प्रजापत्यश्विसरस्वत्य ऋषयः पितरो देवता त्रिष्टुप् छन्दः मधुवाता इति तिसृणां गोतम ऋषि

राम ॥२०॥

पाणौ गृहीत्वा तानेव कुशान्दक्षिणमूलान् कृत्वोशंतस्त्वेत्यनयाकव्यवाडनलादीना वाह्यायन्तु न इति जपित्वा कव्यवाड लनलादींस्तर्पयेत्॥ तद्यथा। उशन्तस्त्वेति प्रजापतिर्ऋषिः पितरो देवता अनुष्टुप् छन्दः आवाहने वि०॥ ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे॥ आयन्तुन इत्यस्य शङ्खऋषिः पितरो देवता त्रिष्टुप् छन्दः जपे वि०॥ ॐ आयन्तुनः पितरः सोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः। अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्॥ ततोऽञ्जलिंप्रपूर्य पितृतीर्थेनाञ्जलिं क्षिपेत्॥ ॐ कव्यवाडनलस्तृ०॥ ॐ सोमस्तृ०॥ ॐ यमस्तृ०॥ ॐ अग्निष्वात्ताः पितरस्तृप्यन्तां॥ ॐ सोमपाः पितरस्तृ०॥ वर्हिषदः पितरस्तृ०॥ ॐ यमाय नमः॥ ॐ धर्मराजाय०। ॐ मृत्यवे०। ॐ अन्तकाय०॥ ॐ वैवस्वताय०। ॐ कालाय०। ॐ सर्वभूतक्षयाय०॥ ॐ औदुम्बराय०॥ ॐ दध्नाय०॥ ॐ नीलाय०॥ ॐ परमेष्ठिने०॥ ॐ वृकोदराय०॥ ॐ चित्राय नमः॥ ॐ चित्रगुप्ताय०। गोत्रनामपूर्वकं सव्यं जान्वाच्य पितृतीर्थेन दक्षिणामुखेन द्विगुण

स्ना० वि० ॥ १७ ॥ काञ्चात्वचोपदधातिऋक्च एवतस्या आयतनमथयांयजुषापुरुषएवतस्या आयतनमथया ॐ साम्नापुष्करपर्णमेवतस्या आयतनमेवंतौष्टकः ॥ २१ ॥ तेवाऽएते तेवाएतेउभेएषचऋक्मएतच्चपुष्करवर्णमेतंपुरुषमपीतउभेह्यृक्सामेयजुरपीतए वम्बेकेष्टकः ॥ २२ ॥ सएषएवमृत्युः । सऽएषएवमृत्युर्यएषएतस्मिन्मण्डलेपुरुषोयश्चायंदक्षिणेचन्पुरुषःसएषएवंवि दश्चात्माभवतिसयदैवम्विदस्माल्लोकात्मैत्यथैतमेवात्मानमभिसम्भवतिसोमृतोभवतिमृत्युर्ह्यस्यात्माभवति ॥ २३ ॥ स माप्तंमण्डलब्राह्मणं ॥ एवंकायवाङ्मनोभिर्नमस्कृत्यासनोपर्युपविशेत् ॥ अथ ब्रह्मयज्ञः ॥ ॥ तस्य च कालःछन्दो गपरिशिष्टेऽभिहितः ॥ सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः ॥ वैश्वदेवावसानेवानान्यत्रेतिनिमित्तकात् ॥ ततःब्रह्मयज्ञात्पूर्वंस्वशरीरेसर्वानुक्रमसूक्तोक्तन्यासान्कुर्यात् ॥ तेयथा ॥ मुखे ॥ ॐ तिर्यग्बिलायचमसायो र्ध्वबुध्नाय नमः । चक्षुषोः ॥ ॐ गोतमभरद्वाजाभ्यां नमः । कर्णयोः ॥ ॐ विश्वामित्रजमदग्निभ्यां ० । ना सापुटयोः ॥ ॐ वसिष्ठ कश्यपाभ्यां० वाचि ॥ ॐ अत्रये नमः शिरसि ॥ ॐ गायत्र्यै नमोग्नये ० ग्रीवायां ॥ राम ॥ १७ ॥

43

वहवश्चेतिहब्रूयाद्येद्ध्यसावमुत्रतेनैकोथयदिहप्रजासुवहुधाव्याविष्टस्तेनोवहवः ॥ १६॥ तदाहुः तदाहुरन्तिकेऽत्यु
दूरा ३ इत्यन्तिकेचदूरेचेतिहब्रूयाद्यदह्वायमिहाध्यात्मन्तेनान्तिकेथयदसावमुत्रतेनोदूरे ॥ १७ ॥ तदेषश्लोकोभव
ति तदेषश्लोकोभवत्यन्नेभात्यश्रितोरसानाꣳ संचरेष्टतइतियदेतन्मण्डलंतपतितदन्नमथयएषएतस्मिन्मण्डलेपुरुषःसो
त्तासएतस्मिन्नन्नेपश्रितोभातीत्यधिदैवतं ॥ १८ ॥ अथाध्यात्मं अथाध्यात्ममिदमेवशरीरमन्नमथयोयंदक्षिणेक्षन्पु
रुषःसोत्तासएतस्मिन्नन्नेपश्रितोभाति ॥ १९ ॥ तमेतमग्निरित्यध्वर्यवउपासते ॥ यजुरित्येषहीदꣳ सर्वंयुनक्तिसामेति
छन्दोगाऽएतस्मिन्हीदꣳ सर्वꣳ समानमुक्थमितिवह्वृचाएषहीदꣳ सर्वमुत्थापयति यातुरितियातुविदएतेनहीद
ꣳ सर्वंयतंविषमितिसर्पाःसर्पइतिसर्पविदऊर्गितिदेवारयिरितिमनुष्यामायेत्यसुराःस्वधेतिपितरोदेवजनइतिदेवजन
विदोरूपमितिगन्धर्वागन्धइत्यप्सरसस्तंयथायथोपासतेतदेवभवतितद्धैनान्भूत्वावतितस्मादेनमेवंवित्सर्वैरेवैतैरुपासीतस
र्वꣳ हैतद्भवतिसर्वꣳ हैनमेतद्भूत्वावति ॥ २० ॥ सएषत्रीष्टकाग्निः ॥ सऽएषत्रीष्टकोग्निर्ऋगेकायजुरेकासामैकातद्यां

ला० वि० वꣳह्येतन्मिथुनंपरमोह्येषआनन्दः ॥ ११ ॥ तस्मादेवंवित्स्वप्यात् । तस्मादेवंवित्स्वप्या लोक्यꣳ हैतेएवतद्देवतेमि

॥१६॥ थुनेनप्रियेणधाम्नासमर्द्धयतितस्मादुहस्वपतंधुरेवजवोधयेन्नेदेतेदेवतेमिथुनीभवन्त्यौहिनसानीतितस्मादुहैतत्सुषुपुषःश्ले

ष्मणमिवमुखंभवत्येतेएवतद्देवतेरेतःसिञ्चतस्तस्माद्रेतसइदꣳसर्वꣳसंभवतियदिदंकिञ्च ॥ १२॥ सएषएवमृत्युः स

ऽएषएवमृत्युर्यएषएतस्मिन्मण्डलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषस्तस्यहैतस्यहृदयेपादावतिहतौतौहैतदाच्छिद्योत्क्राम

तिसयदोत्क्रामत्यथहैतत्पुरुषोम्रियतेतस्मादुहैतत्प्रेतमाहुरच्छेद्यस्येति ॥१३॥ एषउएवप्राणऽएषहीमाःसर्वाःप्रजाःप्रणय

तितस्यैतेप्राणाःस्वाःसयदास्वपित्यथैनमेतेप्राणाःस्वाअपियन्तितस्मात्स्वाप्ययःस्वाप्ययोहवैत ꣳस्वप्नइत्याचक्षतेपरोक्षंपरो

क्षकामाहिदेवाः ॥१४॥ सएतैःसुप्तः । सएतैःसुप्तोनकस्यचनवेदनमनसासङ्कल्पयतिनवाचान्नस्यरसंविजानातिनप्रा

णेनगन्धंविजानातिनचक्षुषापश्यतिनश्रोत्रेणशृणोत्येतꣳह्येतेतदापीताभवन्तिसएषएकःसन्प्रजासुबहुधाव्याविष्टस्तस्मा राम

देकासतीलोकंपृणात्सर्वमग्निमनुविभवत्यथयदेकएवतस्मादेका ॥ १५ ॥ तदाहुः तदहुरेकोमृत्युर्बहवा ३ इत्येकस्म ॥१६॥

षतदाभवतीत्युएवाधियज्ञं ॥ ६ ॥ अथाध्यात्मं ॥ यदेतन्मण्डलंतपतियश्चैषरुक्मइदंतच्छुक्लमक्षन्नथयदेतदर्चिर्दीप्यते
यच्चैतत्पुष्करपर्णमिदंतत्कृष्णमक्षन्नथयएषएतस्मिन्मण्डलेपुरुषोयश्चैषहिरण्मयःपुरुषोयमेवसयोयंदक्षिणेक्षन्पुरुषः ॥
७॥ सएषएवलोकंपृणा तामेषसर्वोग्निरभिसम्पद्यतेतस्यैतन्मिथुनंयेयꣳसव्येक्षन्पुरुषोर्द्धमुहैतदात्मनोयन्मिथुनंयदा
वैसहमिथुनेनाथसर्वोथकृत्स्नःकृत्स्नतायैतद्यदेतेद्वेभवतोद्वन्द्वꣳहिमिथुनंप्रजननन्तस्माद्द्वेलोकंपृणेउपधीयेतेतस्माद्द्वा
भ्यांद्वाभ्यांचितिंप्रणयन्ति ॥ ८ ॥ सऽएषऽएवेन्द्रः । सएषएवेन्द्रोयोयंदक्षिणेक्षन्पुरुषोथेयमिन्द्राणीताभ्यांदेवाएतां
विधृतिमकुर्वन्नासिकांतस्माज्जायायाअन्तेनाश्नीयाद्वीर्यवान्हास्माज्जायतेवीर्यवन्तमुहसाजनयतियस्याअन्तेनाश्नाति ॥
९ ॥ तदेतद्देवव्रतम् । तदेतद्देवव्रतꣳराजन्यबन्धवोमनुष्याणामनुतमांगोपायन्तितस्मादुतेषुवीर्य्यवांजायतेत्तत्राका
वयसाꣳसाक्षिप्रश्येनंजनयति ॥१०॥ तौहृदयस्याकाशंप्रत्यवेति । तौहृदयस्याकाशंप्रत्यवेत्यमिथुनीभवतस्तौयदामिथु
नस्यान्तंगच्छतोथहैतत्पुरुषःस्वपितितद्यथाहवैदंमानुषस्यमिथुनस्यान्तंगत्वासम्विदिवभवत्येवꣳहैवैतदसंविदिवभवतिदै

शा० वि० म्टत्युः सऽएषएऽवम्टत्युर्यएऽषएतस्मिन्मण्डलेपुरुषोथैतदम्टतंयदेतदर्चिर्दीप्यतेतस्मान्मृत्युर्नम्रियतेम्टतेह्यन्तस्तस्मादुनदृश्य
॥१५॥ तेम्टतेह्यन्तः ॥ ३ ॥ तदेषश्लोकोभवति ॥ तदेषश्लोकोभवत्यं तरंम्टत्योरम्टतमित्यवरं ᳫ ह्येतन्मृत्योरम्टतंम्टत्यावम्टत
माहितमित्येतस्मिन्हिपुरुषएतन्मण्डलंप्रतिष्ठितन्तपतिम्टत्युर्व्विवस्वन्तंवस्तऽइत्यसौवा ऽआदित्योव्विवस्वानेषह्यहोरात्रे
व्विवस्तेतमेषव्वस्ते सर्वतोह्येनेनपरिवृतोम्टत्योरात्माव्विवस्वतीत्येतस्मिन्हिमण्डल ऽएतस्यपुरुषस्यात्मैतदेषश्लोकोभवति
॥४॥ तयोर्व्वाएतयोरुभयोरेतस्यचार्चिषऽएतस्यच पुरुषस्यैतन्मण्डलंप्रतिष्ठातस्मान्महदुक्थम्परमस्यैनशठं सेन्नेदेतांप्र
तिष्ठांछिनदा ऽइत्येताᳫ हसप्रतिष्ठांछिंतेयोमहदुक्थंपपरस्यै शठं सतितस्मादुक्थशसंभूयिष्ठं परिचक्षतेप्रतिष्ठाच्छिन्नो
हिभवतीत्यधिदेवतम् ॥ ५ ॥ अथाधियज्ञं ॥ यदेतन्मण्डलन्तपत्ययठं सरुक्मोथयदेतदर्चिर्दीप्यत ऽइदन्तत्पु
ष्करपर्णमापोह्येताआपःपुष्करपर्णमथयएषएतस्मिन्मण्डलेपुरुषोयमेवसयोयठं हिरण्मयःपुरुषस्तदेतदेवैतलय ठं राम
संस्कृत्येहोपधत्तेतद्यज्ञस्यैवानुस ᳫ स्थामूर्द्ध्वमुत्क्रामतितदेतमप्येतियएषतपतितस्मादग्निन्नाद्रियेतपरिहन्तुममुवह्ये ॥१५॥

तिरेकन्तन्मेमनः शिवसंकल्पमस्तु ॥ १ ॥ येनकर्म्माणि ॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः यद
पूर्व्वंयक्षमन्तः प्रजानान्तन्मेमनः शिवसंकल्पमस्तु ॥ २॥ यत्प्रज्ञानम् यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजा
सु यस्मान्नऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः शिवसङ्कल्पमस्तु॥३॥येनेदम् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृते
नसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवसङ्कल्पमस्तु ॥ ४ ॥ यस्मिन्नृचः सामयजूꣳषियस्मिन्प्रतिष्ठितार
थनाभाविवाराः यस्मिंश्चित्तꣳ सर्व्वमोतम्प्रजानान्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिव यन्मनुष्या
न्नेनीयतेभीशुभिर्व्वाजिनइव हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ६ ॥ अथमण्डलब्राह्मणं ॥
मण्डलब्राह्मणस्यविवस्वानृषिर्वायुर्दे०सूर्योप० ॥ यदेतन्मण्डलंतपतितन्महदुक्थन्ताऋचः सऋचांलोकोथयदेतदर्च्चिर्दी
प्यतेतन् महाव्रतंतानिसामानिससाम्नांलोकोथयऽएषऽएतस्मिन्मण्डलेपुरुषः सोग्निस्तानियजूꣳषिसयजुषांलोकः ॥१॥
सैषात्रय्येवविद्यातपति ॥ तद्धैतदप्यविद्वाꣳसआहुस्त्रयीवाऽएषाविद्यातपतीतिवाग्घैवतत्पश्यन्तीवदति॥ २ ॥ सएषएव

ला० वि० तंय्यज्ञम् तंय्यज्ञंवर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ॥९॥ यत्पुरुषं ॥ यत्पुरुषंव्यद
॥ १४ ॥ धुः कतिधाव्यकल्पयन् मुखंकिमस्यासीत्किम्बाहूकिमूरूपादाऽउच्यते ॥ १० ॥ ब्राह्मणोस्य ॥ ब्राह्मणोस्यमुखमासीद्बा
हूराजन्यःकृतः ऊरूतदस्ययद्वैश्यःपद्भ्या ७ शूद्रोअजायत ॥११॥ चन्द्रमामनसः ॥ चन्द्रमामनसोजातश्चक्षोःसूर्योऽअ
जायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याआसीत् ॥ नाभ्याऽआसीदन्तरिक्ष ७ शीर्ष्णोद्यौः
समवर्त्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोका २ ॥अकल्पयन् ॥ १३ ॥ यत्पुरुषेण ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत
वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मः शरद्धविः ॥१४॥सप्तास्य ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः देवायद्यज्ञन्त
न्वानाऽअवध्नन्पुरुषंपशुम् ॥१५॥ यज्ञेनयज्ञम् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महि
मानःसचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥ १६ ॥अथशिवसंकल्पः ॥ यज्जाग्रत इति षड्चस्यशिवसंकल्पऋषिर्मनो देवता राम
त्रिष्टु०सूर्योपस्थानेविनियोगः ॥ यज्जाग्रतः यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्यो ॥ १४ ॥

ऋतम्मर्त्यञ्च॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥१७॥ अथ पुरुष सूक्तं ॥ सहस्र शीर्षेति षोड़शानां
नारायण पुरुषऋषिः पञ्चदशानामनुष्टुप्छन्दः। षोड़श्यास्त्रिष्टुप्छन्दः। पुरुषोदेवता। सूर्य्योपस्थाने विनियोगः॥
ॐ: सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥ सभूमिं सर्वतस्पृत्वात्यतिष्ठद्दशांगुलम्॥ १॥ पुरुषएवेदं सर्वं
यद्भूतंयच्चभाव्यम्॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्य। एतावानस्यमहिमातोज्यायांश्च
पूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥३॥ त्रिपादूर्द्ध्वः। त्रिपादूर्द्ध्व उदैत्पुरुषःपादोस्येहाभवत्पुनः। ततो
विष्वंव्यक्रामत्साशनानशनेअभि ॥४॥ ततोविराड ततोविराडजायतविराजोअधिपूरुषःसजातोअत्यरिच्यतप
श्चाद्भूमिमथोपुरः॥ ५॥ तस्माद्यज्ञात्॥ तस्माद्यज्ञात्सर्वहुतःसम्भृतंपृषदाज्यम् पशूँस्तांश्चक्रेवायव्यानारण्याग्रा
म्याश्चये ॥ ६ ॥ तस्माद्यज्ञात॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे छन्दांॐसिजज्ञिरेतस्माद्यजुस्तस्माद
जायत ॥ ७ ॥ तस्मादश्वाः॥ तस्मादश्वाअजायन्तयेकेचोभयादतः गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः ॥८॥

अथ हेमाद्रि प्रयोगः ॥ सुमुखश्चैकदन्तश्च कपिलोगजकर्णकः लम्बोदरश्चविकटोविघ्ननाशोविनायकः धूम्रकेतुर्गणाध्यक्षो भालचन्द्रोगजाननः द्वादशैतानिनामानि यःपठेच्छृणुयादपि विद्यारम्भेविवाहेच प्रवेशेनिर्गमेतथा संग्रामेसङ्कटेचैव विघ्नस्तस्यनजायते शुक्लाम्बरधरंविष्णुं शशिवर्णञ्चतुर्भुजं प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये ४ अभीप्सितार्थसिध्यर्थं पूजितोयःसुरासुरैः सर्वविघ्नहरेतस्मै श्रीगणाधिपतयेनमः वक्रतुण्डमहाकाय सूर्यकोटिसमप्रभ अविघ्नंकुरुमेदेव सर्वकार्येषुसर्वदा ॥ ६ ॥ वागीशाद्यासुमनसः सर्वार्थानामुपक्रमे ॥ यन्नत्वाकृतकृत्यास्युस्तन्नामामिगजाननं ॥ ७ ॥ गणनाथंनमस्कृत्य नमस्कृत्यपितामहं ॥ विष्णुरुद्रंश्रियंदेवीं वन्देभक्त्यासरस्वतीं ॥८॥ स्थानक्षेत्रंनमस्कृत्य दिननाथंनिशाकरं ॥ धरणीगर्भसम्भूतं शशिपुत्रंबृहस्पतिं ॥ ६ ॥ दैत्याचार्यंनमस्कृत्य सूर्यपुत्रंशनैश्चरं ॥ राहुंकेतुंनमस्कृत्य यज्ञारम्भेविशेषतः॥१०॥शक्रादिदेवताःसर्वांऋषींश्चैवतपोधनान् गर्गंमुनिंनमस्कृत्य नारदंपर्वतंतथा ॥११॥ वसिष्ठंमुनिशार्दूलं विश्वामित्रञ्चगोभिलं॥ अगस्त्यञ्चपुलस्त्यञ्च दक्षमित्रंपराशरं॥ भरद्वाजञ्चमाण्डव्यं याज्ञवल्क्यञ्चगालवं ॥ १२॥ अन्येविप्रास्तपोयुक्ता वेदशास्त्रविचक्षणा ॥ १३ ॥ तान्सर्वान् प्रणिपत्याहं शुभकर्मसमारभे ॥ लाभस्तेषां जयस्तेषां कुतस्तेषांपराजयः ॥ येषामिन्दीवरःश्यामो हृदयस्थोजनार्दनः ॥ अग्रतःश्रीनृसिंह

श्च दृष्टतोदेवकीसुतः॥ रचतांपार्श्वयोर्देवौ भ्रातरौरामलक्ष्मणौ॥ १५॥ ओम् स्वस्तिश्रीमुकुन्द सच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमाया शक्ति विजृम्भित अविद्यायोगात्कालकर्म्मस्वभावाविर्भूत महत्तत्वोदिताहङ्कारत्रतीयोद्भूत वेदादिपञ्चकेन्द्रियदेवतानिर्मितोडुकटाहे चतुर्दशलोकात्मके लीलयातन्मध्यवर्तिभगवतः श्रीनारायणस्यनाभि कमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिंकुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्तिः स्थितिलयकारणस्यरचाशिचाविचचण स्यप्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भवगतो महापुरुषस्य श्रीमदादि नारायणस्य अचिन्त्या परिमितशक्त्याध्येयमानस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्मांडानोमेकतमेरव्यक्तमहदंकारपृथिव्यप्तेजोवाय्वाकाशाद्यकरणैरावृते अस्मिन्महति ब्रह्माण्डखण्डयोर्मध्ये आधारशक्ति श्रीमदादिवाराह दंष्ट्राग्रविराजिते कूर्मानन्तवासुकि तक्षक कुलिककर्कोटक पद्मसहापद्मशंखाद्यष्टमहानागैः॥ संधियमाणे ऐरावत पुण्डरीक वामन कुमुदांजन पुष्पदन्त सार्वभौम सुप्रती काष्टदिग्गज परिप्रतिष्ठितस्य अतल वितल सुतल तलातल रसातल महातल पाताल लोकस्योपरिभागे भूर्लोक भुवर्लोक स्वर्लोक महर्लोक जनलोक तपलोक सत्यलोकादि सप्तलोकस्याधोभागे चक्रवालशैल महावलय नगमध्यवर्तिनो महाकाल महाफणिराजशेषस्य सहस्र फणानांमणिमण्डल मण्डिते

दिग्दन्ति शुण्डोत्तंभिते अमरावती भोगवती सिद्धवती गान्धर्व्ववती कांच्यवन्त्यलकावती यशो वतीति पुण्यपुरीप्रविष्ठिते इन्द्राग्नियमनिर्ऋति वरुण वायु कुवेरे शानेतिदिक्पालप्रतिष्ठितेलो कालोकाचलवलयिते लवणेक्षुसुरासर्पिद्धिक्षी रोदकेतिसप्तार्णवपरिवृते जम्बुप्लक्षशाल्मलिकु शक्रौञ्चशाकपुष्कराख्य सप्तद्वीपयुते इन्द्रकांस्य ताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेति न वखण्ड मण्डिते सुवर्णगिरि कर्णिकोपेत महा सरोरुहाकार पञ्चाशत कोटि योजन विस्तीर्ण भूमण्डले अयोध्या मथुरा माया काशीकांच्य वन्तिका द्वारावतीतिसप्तपुरीप्रतिष्ठिते शालग्रा म शम्भल नन्दिग्रामेति ग्रामत्रयविराजिते चम्प कारण्य वदरिकारण्य दण्डकारण्या वृंदारण्य धर्मारण्य पद्मारण्य गुह्यारण्य जम्बुकारण्या दीनांमध्ये नैमिषारण्ये सुमेरु निषद रजत कूट शुम्भकूट श्रीकूट हिमाचलानां हरिवर्षकिं पुरुषवर्षयोश्च दक्षिणे नवसहस्रस्र योजन विस्तीर्णे भरतखण्डे मलयाचल सह्याचल विं ध्याचलानामुत्तरेण स्वर्णप्रस्थ चण्डप्रस्थ सूक्तिक आवर्तक रमणक महारमणक पाञ्चजन्य सिंह ल लङ्केति नवखण्डोपद्वीपमण्डिते दक्षिणाव स्थितरेणुकाद्दयसूकर: काशी काञ्ची कालि काल वटेश्वर कालञ्जर महाकालेति नवोखर युते द्वादशज्योतिलिङ्ग गङ्गा यमुना सरस्वतीन र्मदा तापी पयोष्णी कावेरी त्यादिपुण्यनदी विलसिते हिमवन्मेरुगोवर्द्धनक्रौञ्च श्रीशैलकचि

तकूट हेमकूट महेन्द्र मलय सह्य विंध्य पा
रिपात्राद्यनेकपर्वत समन्विते मतङ्ग माल्यव
किष्कन्ध ऋष्यश्टङ्गेति पञ्चमहानगरयुते को
कन्त हिरण्यश्टङ्गकुजार्वुद मणिकर्णी वट शा
लग्राम सूकर मथुरा गया निष्क्रमण लोहा
र्गल पोतस्वामी प्रभास वदरीतिचतुर्दशगु
ह्यविलसिते जंवुद्वीपे कर्मभूमौस्वाध्यवर्ती स्व
र्गस्थितामराद्यासितावतारे गङ्गादिसरिद्भिः
पाविते भारतेवर्षे निखिलजनपावनपरम भाग
वतोत्तमशौनकादि निवासिते नैमिषारण्ये
आर्यावर्तान्तरगत ब्रह्मावर्तैकदेशे जनपदे कुरु
क्षेत्रादिमध्यरेखायाः अमुकदिग्भागे गङ्गायाः
अमुकतटे अमुकक्षेत्रान्तरवर्तिसीम सूर्या
न्वयसूर्यप्रतिष्ठिते श्रीमन्नारायणनाभि कम
लोद्भूतसकलजगत्स्रष्टुः परार्द्धद्वयजीविनोब्रह्म
णोद्वितीयपरार्द्धे पञ्चाशदधिकेवर्षे प्रथममासे
प्रथमपक्षे प्रथमदिवसे अह्नोद्वितीययामे तृतीये
मुहूर्ते रथन्तरादिद्वात्रिंशत्कल्पानांमध्ये अष्टमे
श्वेतवराहकल्पे स्वायंभुवादिमन्वन्तराणांमध्येस
प्तमेवैवस्वतमन्वन्तरे सत्युगादिचतुर्युगानांमध्ये
अष्टाविंशतिमेकलियुगे तत्प्रथमविभागे संवत्स
राणांव्यतिक्रांतानांधनुसाहस्त्रासप्तत्यधिकायांत
दुपरिवर्तमाने श्रीमन्नृपविक्रमार्कसमयातीतसं
वत्सप्तदशशताधिक यथासंख्यागमे चान्द्र सावन
सौरनक्षत्रादि भ्रमित प्रभवादि षष्टिसंवत्सरा
णांअमुक नाम्निसंवत्सरे उत्तरगोलावलंविनिश्री
मार्तण्डमण्डले अमुक ऋतौ अमुक मासे अमु

अनेत्यविकारे इति लिंगं तामर्थतः पठति अंत्यबाधे इति अंत्यस्य बाधे कार्य्यप्राप्तौ अर्थादनेकानंत्यस्य
श्रमाविन्यर्थः अन्यथा राणो न इत्यादौ नेनेत्यादावेव स्यान्न तु नमतीत्यादाविति भाष्ये स्पष्टं अह्नो
पोनोच्चः सांतेत्यादावनेकक्लिष्टकल्पनापेत्तयेयं व्याख्या किंच भसंज्ञायां कार्यकाले प्रत्याश्रय
णमत्राकं परत्वेन पदसंज्ञाबाधत्वानुपपत्तेः राज्ञ इत्यादौ नलोपस्यासिद्धत्वान् नैमल्लोपो न
इति नलोपे प्रत्यात्प्राप्तनलोपैकवाक्यतापन्नपदत्वस्येतदेकवाक्यतापन्नभत्वेन बाधायो
गात्नलोपापत्तेः तस्मादाकडारस्य संज्ञा सुयथोद्देशाश्रयणमेवावश्यकमिति यजादिस्वा

अंत्यबाधेंत्यसदेशस्येति परिभाषामाश्रित्य परस्यैव भत्वं अद्भ्य यङ

दिपरोयो नित्यर्थस्यन तत्र लाभः ष्यङः संप्रसारणमिति सूत्रस्थं कार्यकाले संज्ञापरिभाषं भा
ष्ये त्पपास्थितमिदं भवति यचि भमिति तत्र यजादिपरतया कारं विशेषयिष्यामः यनाकारमिति
भाष्यं चैकदेशोक्तिः यजादिप्रत्ययस्यांगांशे उपस्थितोकादंतया तेनानो विशेषणयोगाच्च
अन्तराव सर्वफलानामन्यथासिद्धिप्रदर्शनेन तस्माद्यान्येतान्यस्याः परिभाषायाः प्रयोजनानि
तदर्थमेषा कर्तव्येति उपसंहृतं भाष्ये इति भावः अंत्यसदेशस्येति अंत्येन समानो देशो
यस्य तस्य त्विति तत्वादत्यवर्णानद्गर्गयादिनरो व्यवधाने भवति चलीकृत्य इत्यादौ ऋकारांत
भावादिति चेत् भावः परस्यैवेति देशादस्यैवेत्यर्थः ॥

नेनेति अप्रत्ययातः कृदन्तत्वेन नित्यसमास इत्यतो ऽनुवृत्तेः समासग्रहणे नो नत्वपदादेशे विकृधातुरूपे ऽन्तर
पदे इत्यर्थोपत्तावयस्कृदित्यादावेव स्यादिति भावः उद ईत् अश्चेश्च इत्यनुवर्त्तते समः स० समो मि
ङि तिसमः इगि तिवानकृतं परिभाषास्थानकृतमगो रवापत्तेः तिरसस्ति० अलोप इत्यत्र शाक
ध्वादित्वात्पररूपेणाकारः प्रश्लिष्यते अप्रस्याऽलोपो लोपाभावो यस्मिन्नंचनाविन्यर्थे स्तदाहरणं
तेनायस्कारः उदङ् उदञ्चौ ग्रासादावचि उद ईत् उच्छ्वासात्परस्य लुप्तनकारस्यां
चतेर्भस्याकारस्य ईत् उदीचः उदीचा उदग्भ्यां समः समि वप्रत्ययान्तेंचतौ परे
सम्यङ् सम्यञ्चौ सम्यञ्चः समीचः समीचा सहस्य सध्रिः सध्र्यङ् तिरसस्तिर्यलो
पे अलोपे त्वाकारे चतौ वप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात् तिर्यङ् तिर्यञ्चौ
तिर्यञ्चः तिरश्चः तिरश्चा तिर्यग्भ्यामित्यादि नांचेः पूजायां पूजार्थस्यांचतेरु
पधाया नलोपो न स्यात् अलुप्तनकारत्वान्नुम् प्राङ् प्राञ्चौ प्राञ्चः ॥
णाकारेति तिरश्चेति श्नुत्वे ऽलोपस्य स्थानिवत्त्वं न तु न पूर्वत्रासिद्धीयेन स्थानिवदिति न निषे
